**आदौ-मुख्यवार्ता:**

- राष्ट्रपति: द्रौपदीमुर्मु: अल्जीरिया, मॉरिटानिया, मलावी इत्येतेषां देशानां यात्राया: अनन्तरं नवदिल्लीं प्रति प्रस्थिता।
- उपराष्ट्रपतिना श्रीजगदीपधनखड़ेन शिक्षाया: व्यावसायिकरणत्वात् शिक्षा प्रभाविता भवन्ती अस्तीति प्रतिपादितम्।
- केन्द्रीयवित्तमन्त्रिणा निर्मला-सीतारामन् इत्यनया प्रोक्तं यत् मैक्सिकोभारतयो: संयुक्तप्रयासै: अत्युन्नत-वैद्युतिक-उपकरणादिषु विविधीकरणद्वारा सुकरास्थिति: इतोऽपि सुदृढा भवितुमर्हतीति।
- चतुर्विंशत्यधिक-द्विसहस्रतम-वर्षस्य शरसंधान-विश्वचषक-प्रतिस्पर्धाया: निर्णायक-प्रतियोगिता अद्य मेक्सिकोदेशे आरभ्यते।
- भारतीयर्तुविज्ञानविभागेन अग्रिमयो: दिनद्वयो: दिनत्रयो: वा तमिलनाडु, पुदच्चेरी, कर्णाटकसहित राष्ट्रस्य दक्षिण-भागेषु धारासारवर्षाया: सम्भावना प्रकटितास्ति।

**अथ वार्ता:**

**राष्ट्रपति-अफ्रीकादेशा:**

राष्ट्रपति: द्रौपदीमुर्मु: अल्जीरिया, मॉरिटानिया, मलावी इत्येतेषां देशानां यात्राया: अनन्तरं नवदिल्लीं प्रति प्रस्थिता। अस्मत्वार्ताहरेण प्रोक्तं यत् राष्ट्रपतिपदासीनाया: द्रौपदी-मुर्मु-वर्याया: सोत्साहं पारम्परिकरीत्या च निर्गमन-समारोह: समायोजित:। मलावीदेशस्य उपराष्ट्रपतिना माइकल-बिज़विक-इत्यनेन अन्यैश्च अधिकारिभि: तस्यै यात्रावसानोत्सर्ग: दत्त:। राष्ट्रपतिना अनया यात्रया अफ्रीकीदेशै: सह भारतस्य सम्बन्धेषु एक: नवीनोध्याय: योजितोऽस्ति।

**सीकर-उपराष्ट्रपति:**

उपराष्ट्रपतिना श्रीजगदीपधनखड़ेन शिक्षाया: व्यावसायिकरणत्वात् शिक्षा प्रभाविता भवन्ती अस्तीति प्रतिपादितम्। श्रीधनखड़: अद्य मध्याह्ने सीकरजनपदस्य एकस्मिन् अशासकीय-शिक्षणसंस्थाने भाषमाण: अवोचत् यत् शिक्षाया: व्यवसायिकरणं राष्ट्रस्य भविष्याय कदापि स्वस्तिकरं नास्ति' तेनोक्तं यत् शिक्षा कदापि आयस्य साधनं नासीत्, अपितु त्यागस्य, दानस्य, स्वस्थसमाजस्य निर्माणहेतुश्च आसीत्। श्रीधनखड़ेन प्रोक्तं यत् सम्प्रति शिक्षा तादृशं वस्तुभूतमस्ति यस्य विक्रयणं लाभाय क्रियते येन हि शिक्षाया: गुणवत्तायां प्रतिकूलप्रभावा: जायमाना: सन्ति। उपराष्ट्रपतिना प्रोक्तं यत् अनुसंधान-नवाचाराणां सर्वातिबृहत्तमा: लाभार्थिन: उद्योगा: वर्तन्ते, ये हि राष्ट्राय विश्वपटले शक्तिं यच्छन्ति। श्रीधनखड़: उक्तवान् यत् वैदेशिक-आक्रमणकारिण: प्राचीन-भारतस्य ज्ञानकेन्द्राणि नष्टीकृतवन्त:, ब्रिटिशकाले च भारतीयशिक्षणसंस्थानानि समापितानि। तेनोक्तं यत् छात्रा: शिक्षायै विदेशं जिगिमिषन्ति, परन्तु भारते एतदर्थम् अनेके अवसरा: सन्ति। उपराष्ट्रपतिना राष्ट्रिय-शिक्षा-नीते: प्रशंसां कुर्वन् एतां क्रान्तिकर: पदक्षेपोऽस्तीत्यपि उक्तम्।

**निर्मला-मैक्सिको**

केन्द्रीयवित्तमन्त्रिणा निर्मला-सीतारामन् इत्यनया प्रोक्तं यत् मैक्सिकोभारतयो: संयुक्तप्रयासै: विशेषत: सेमीकंडक्टर, प्रिंटेड-सर्किट-फलक सहित अन्येषु अत्युन्नत-वैद्युतिक-उपकरणादिषु विविधीकरणद्वारा सुकरास्थिति: इतोऽपि सुदृढा भवितुमर्हतीति। वित्तमन्त्रिणा मैक्सिको-सिटीति क्षेत्रे व्यापारविनिवेशयो: सहयोगाभिवर्धयितुं भारत-मैक्सिको व्यापारविनिवेशशिखरसम्मेलने भागं भजन्त्या एतदुक्तम्। सम्मेलनेऽस्मिन् मेक्सिको-सिटी इत्यस्य आर्थिकविकासमन्त्री **मनोला-ज़बोल्ज़ा-अल्दामा** इत्येषोऽपि शिखर-सम्मेलनेऽस्मिन् प्रातिभाग्यम् अकरोत्।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**राजनाथ-एनडीसी**

रक्षामन्त्रिणा राजनाथसिंहेन उक्तं यत् अत्याधुनिकप्रविधिषु विनिवेशं कृत्वा अपि चैकस्य सुदृढ-रक्षा-पारिस्थितिकीय-तन्त्रस्य पोषणं कृत्वा प्रशासनेन सुनिश्चिमस्ति यत् सशस्त्रबलानि भविष्यत्कालाय सन्नद्धानि स्युरिति। अद्य नवदिल्ल्यां राष्ट्रिय-रक्षा-महाविद्यालयस्य विशिष्टाचार्यच्छात्राणां द्विषष्टितमं दीक्षान्तसमारोहं सम्बोधयन् श्रीसिंह: अकथयत् यत् साम्प्रतिके काले युद्धभूमि: सागरीय-वाय्वादि पारम्पिरिक-क्षेत्राणि अतिरिच्य बहिर्निर्गताऽस्ति। श्रीसिंहेनोक्तम् यत् सशस्रबलानि सम्प्रति बहुक्षेत्रीय-वातावरणेषु कार्याणि सम्पादयन्ति।

रक्षामन्त्री अवदत् यत् अद्यतनीये पारस्पकितया सम्बद्धे संसारे सैन्यनेतृभ्य: आवश्यकमस्ति यत् भू-राजनीतिम्, अन्ताराष्ट्रिय-सम्बन्धान्, वैश्विक-सुरक्षा-संघटनानि च ते सम्यक्तया विजानीयुरिति।

**जम्मू-कश्मीरे शपथ ग्रहणम्**

जम्मू-कश्मीरेति केन्द्रशासित-प्रदेशे उपराज्यपालेन मनोजसिन्हा वर्येण श्रीनगरस्य ईदगाहेति निर्वाचन-क्षेत्रात् विधानसभा निर्वाचने विजिताय वरिष्ठाय नैशनल कॉन्फ्रेंस दलस्य नेत्रे मुबारक गुल इत्यस्मै कार्यकारी विधानसभा अध्यक्षत्वेन पदस्य गोपनीयतायाश्च शपथग्रहणं कारितम्। अद्य श्रीनगरस्य राजभवने एकस्मिन् समारोहे तस्य शपथग्रहणं जातम्। अस्मिन् अवसरे मुख्यमन्त्री उमर अब्दुल्ला, उपमुख्यमन्त्री सुरिंदरचौधरी, सकीना याटू, जावेद डार:, जावेद राणा, सतीशशर्मा इत्यादयः मन्त्रिमण्डलीय सदस्याः अपि उपस्थिताः आसन्। श्रीगुलः शुक्रवासरे जम्मू-कश्मीरविधानसभायाः सभापतित्वेन नियुक्तः। सः श्वः जम्मू-कश्मीर-विधानसभायाः नवनिर्वाचितेभ्यः सदस्येभ्यः शपथग्रहणं कारयिष्यति।

**झारखंड-इण्डिया-घटबंधनम्**

आगामी झारखण्ड विधानसभा निर्वाचनाय I.N.D.I.A इत्यनेन घटबन्धनेन आसन्दानां विभजनं सुनिश्चितम् । झारखण्ड मुक्ति मोर्चा इति दलेन सह काँग्रेसश्च सप्ततिः आसनेषु प्रतिस्पर्धां करिष्यतः। राँची-नगरे वार्ताहरान् सम्बोधयन् झामुमो दलस्य-कार्यकारी अध्यक्षः हेमन्तसोरेन: उक्तवान् यत् राजद-माकपा-माले दलेभ्यः एकादशासनानि दत्तानि। श्रीसोरेनः अवदत् यत् झामुमो-काङ्ग्रेसयोः मध्ये आसनानां विभाजने शीघ्रमेव निर्णयः भविष्यति। हेमन्त सोरेन् उक्तवान् यत् अभ्यर्थीनां सूचिः अपि सज्जा अस्ति शीघ्रमेव प्रसारिता भविष्यतीति।

**भारतीय-ऋतुविज्ञानविभाग:**

भारतीयर्तुविज्ञानविभागेन अग्रिमयो: दिनद्वयो: दिनत्रयो: वा तमिलनाडु, पुदुच्चेरी, कर्णाटकसहित राष्ट्रस्य दक्षिण-भागेषु धारासारवर्षाया: सम्भावना प्रकटितास्ति। विभागेन सोमवासरान्तं यावत् अण्डमान-निकोबार-द्वीप-समूहेष्वपि एतादृशी एव स्थिति: भविष्यतीति भविष्यवाणी कृताऽस्ति।

**शरसंधान-विश्वचषकस्पर्धा**

चतुर्विंशत्यधिक द्विसहस्रतम-वर्षस्य शरसंधान-विश्वचषक प्रतिस्पर्धायाः निर्णायक-प्रतियोगिता अद्य मेक्सिकोदेशे आरभ्यते। प्रतियोगितायां रिकर्व् तथा कम्पाउण्ड् इवेण्ट् इत्यत्र व्यक्तिगतपुरुषमहिलास्पर्धाः भविष्यन्ति। पञ्चभारतीय धनुर्धराश्च देशस्य प्रातिनिध्यं करिष्यन्ति।

**क्रिकेट**

न्यूजीलैंड-भारतयो: मध्ये क्रीड्यमानायां क्रिकेट-निकष स्पर्धायाम् अद्य चतुर्थदिवसस्य क्रीडाया: समाप्तौ बैंगलुरू नगरे भारतीय दलेन द्विषष्टी-अधिक-चतुश्शत-धावनाङ्कान् विरच्य षडधिकैकशतधावनाङ्कानाम् आधिक्यम् अर्जिमस्ति। यत्र सरफराज-खानस्य सार्धैकशत-धावनाङ्कानां क्रीडया सह नवनवति धावनाङ्काश्च ऋषभपन्तेन अर्जिता:। क्रीडैषा वर्षावाधिता आसीत्। श्व: न्यूजीलैण्ड देश: विजयाय षडधिकैक शतं धावनाङ्कान् विरचिष्यति उत वा भारतीयदलञ्च तत: पूर्वमेव सर्वान् क्रीडकान् पातनाय प्रयतिष्यति।

**।।इति वार्ता:।।**